# SA-I/1/22SAS2CCTC1/24

**द्वितीयसत्रार्द्धः**

**प्रथमपत्रम्**

**शैक्षिकप्रक्रियायां समाजशास्त्रम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **05 (प्रश्नाः) × 05 (अङ्काः) = 25**

1. शिक्षासमाजयोर्मध्ये कः सम्बन्धः? प्रतिपादयत।
2. सङ्घटितवर्गान् वर्णयत।
3. आधुनिकीकरणे शिक्षायाः भूमिकां विवेचयत।
4. सांस्कृतिकसन्दर्भे शिक्षायाः भूमिका का?
5. वञ्चितवर्गाणां शिक्षाव्यवस्थायै भारतीयसंविधानेन प्रकल्पितानि सौविध्यानि कानि? विवेचयत।
6. समाजवादस्य स्वरूपं स्पष्टयत।
7. लोकतन्त्रं किमिति विशदयत।

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नाः) × 10 (अङ्काः) = 20**

8. भारतीयसंस्कृतेः समुन्नयने संस्कृतस्य उपकार्यतां विमृशत।
9. सावित्रीबाईफूले–महोदयायाः शैक्षिकं चिन्तनं विवृणुत।
10. निर्देशात्मकसिद्धान्तानां कार्यप्रकृतिं वर्णयत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **01 (प्रश्नः) × 15 (अङ्काः) = 15**

11. शैक्षिकसमाजशास्त्रस्य अर्थः कः? प्रकार्याणि च स्पष्टयत।
12. भारतीयसंविधाने वर्णितानि राष्ट्रियमूल्यानि कानि? विवेचयत।

# SA-I/2/22SAS2CCTC2/24

## द्वितीयसत्रार्द्धः

## द्वितीयपत्रम्

## शिक्षायां सूचना - सम्प्रेषणप्रविधिः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः - क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **05 (प्रश्नः) × 05 (अङ्कः) = 25**

1. सूचनासम्प्रेषणप्रविधेः अर्थं स्वरूपञ्च प्रतिपादयत।
2. अन्तर्जालमाध्यमेन सम्प्रेषणस्य शैक्षिकोपयोगितां वर्णयत।
3. ई-अधिगमस्य शिक्षायां का आवश्यकता? प्रतिपादयत।
4. बालकानां कल्पनाविकासे सञ्चरच्चित्राणां (Animation) कीदृशी उपयोगिता वर्तते? निरूपयत।
5. पारम्परिक-जनसञ्चारसाधनानि कानि? संक्षेपेण वर्णयत।
6. सम्प्रेषणस्य चक्रं विनिर्माय स्पष्टयत।
7. शोधकार्ये उपयुक्तयोः कयोश्चिद् द्वयोः जालस्थानयोः परिचयं लिखत।

### खण्डः - ख

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

8. अधिगमप्रबन्धनप्रणाल्याः (Learning Management System - LMS) सम्प्रत्ययं आवश्यकतां च प्रतिपादयत।
9. शिक्षणाधिगमसाधनत्वेन सङ्गणकस्य उपयोगितां प्रतिपादयत।
10. सूचनासम्प्रेषणयोः आधारतत्त्वानि कानि? प्रतिपादयत।

### खण्डः - ग

**एकः प्रश्न एव समाधेयः।** **01 (प्रश्नः) × 15 (अङ्कः) = 15**

11. शिक्षणाधिगमप्रक्रियायां सूचना-सम्प्रेषणप्रविधेः अनुप्रयोगं विस्तरेण प्रतिपादयत।
12. शिक्षायाम् आधुनिकजनसञ्चारसाधनानां महत्त्वम् उपयोगिताञ्च विस्तरेण प्रतिपादयत।

# SA-I/3/22SAS2CCTC3/24

**द्वितीयसत्रार्द्धः**

**तृतीयपत्रम्**

**अधिगन्ता अधिगमप्रक्रिया च**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **05 (प्रश्नः) × 05 (अङ्कः) = 25**

1. अधिगमप्रक्रियायाः अर्थं परिभाषां च लिखत।
2. अभिरुचिः कथम् अधिगमं प्रभावयति?
3. आत्मसम्प्रत्ययस्य कोऽर्थः?
4. स्मृतिमापनस्य प्रयोजनानि कानि?
5. टॉलमैन्–महोदयस्य अधिगमसिद्धान्तं वर्णयत।
6. बुद्धेः परिभाषाद्वयं विलिख्य मापनोपायान् प्रतिपादयत।
7. अवधानस्य अर्थः कः? भारतीयदृष्ट्या तस्य प्रकारान् च प्रतिपादयत।

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

8. गेस्टाल्ट–अधिगमसिद्धान्तस्य शैक्षिकनिहितार्थं वर्णयत।
9. व्यक्तित्वविकासे पारिवारिकस्थितेः प्रभावं विशदीकुरुत।
10. अधिगमप्रक्रियायाम् अभिप्रेरणस्य महत्त्वं सोदाहरणं प्रतिपादयत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **01 (प्रश्नः) × 15 (अङ्कः) = 15**

11. भारतीयदर्शनानुसारं बुद्धेः स्वरूपं प्रतिपादयत।
12. भाषात्मकविकासदृष्ट्या पियाजे–व्यागोत्सकी–चोमस्की–महोदयानां विचारान् वर्णयत।

# SA-I/4/22SAS2EDTC4A/24

## द्वितीयसत्रार्द्धः

## चतुर्थपत्रम्

## मूल्यशिक्षा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **05 (प्रश्नः) × 05 (अङ्कः) = 25**

1. 'मूल्यम्' नाम किम्? मूल्यप्रकृतिश्च का?
2. वेदस्मृतिभगवद्गीतासु विद्यमानानां मूल्यस्रोतसां प्रतिपादनं क्रियताम्।
3. भौतिकाध्यात्मिकनैतिकानि मूल्यानि कानि?
4. मूल्यनिर्धारकत्वेन संस्कृतेः धर्मस्य च भूमिकां विशदयत।
5. महात्मागान्धिनः विवेकानन्दस्य च मूल्यसम्बद्धसम्प्रत्ययान् विवेचयत।
6. अध्यापकशिक्षायां मूल्यशिक्षायाः का आवश्यकता वर्तते?
7. मूल्यशिक्षणविधयः के सन्ति?

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

8. प्लेटो, रूसो, जानड्यूवी, मोरिया मान्टेसरी इत्येतेषां मूल्यसम्बद्धचिन्तनानि प्रतिपाद्यन्ताम्।
9. जैविकमनोवैज्ञानिकसामाजिकमूल्यप्रभेदाः विवेचनीयाः।
10. मूल्यस्पष्टीकरणोपागमं विविच्य मूल्यविश्लेषणोपागमं विशदयत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **01 (प्रश्नः) × 15 (अङ्कः) = 15**

11. मूल्यशिक्षायां विद्यालयाध्यापकयोः भूमिकां स्पष्टीकृत्य व्यक्तित्वविकासे मूल्यानां प्रभावं च स्पष्टीकुरुत।
12. समसामयिकसमाजे मूल्यशिक्षायाः आवश्यकताः काः? मूल्यानां मूल्याङ्कनप्रविधयश्च के? वर्णयत।

# SA-I/4/22SAS2EDTC4B/24

## द्वितीयसत्रार्द्धः

## चतुर्थपत्रम्

## समावेशात्मकशिक्षा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **05 (प्रश्नः) × 05 (अङ्कः) = 25**

1. समावेशात्मकशिक्षया किमभिप्रेतम्? आवश्यकता च का?

2. राष्ट्रियपाठ्यचर्यायाः रूपरेखायां (2005) राष्ट्रियशिक्षानीतौ च समावेशात्मकशिक्षायाः विधिकप्रावधानं निरूपयत।

3. 'सर्वशिक्षाभियानम्' इत्यत्र समावेशात्मकशिक्षायाः स्वरूपं वर्णयत।

4. विशिष्टबालानां सामाजिक-शैक्षिक-अधिगमक्रियाकलापेषु कथम् अन्तर्भावः भवितुमर्हति?

5. रचनात्मकक्रियाकलापसन्दर्भे सहाध्यायिकृताध्यापनमिति व्यूहस्य प्रभावं स्पष्टयत।

6. "मन्दितमतयः सांवेगिकदृष्ट्या विशिष्टाः बालाः" इत्यस्य कोऽर्थः?

7. भाषाशिक्षणे योगकलानाटकादिषु च समावेशात्मकशिक्षाव्यूहरचनार्थं के निर्देशाः सम्भवन्ति?

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

8. प्राथमिकमाध्यमिकशिक्षायाः सार्वभौमीकरणक्रियायां समावेशात्मकशिक्षाव्यूहरचनां प्रतिपाद्य तदीय--प्रभावान् निर्दिशत।

9. राष्ट्रियशिक्षानीतिः - (1986), POA (1992), निशक्तव्यक्तेः अधिनियमः (1995), इत्याधारेण समावेशात्मकशिक्षायाः विधिकप्रावधानानि स्पष्टयत।

10. समावेशात्मकशिक्षायाः प्रोत्साहनाय राष्ट्रियान्ताराष्ट्रियाभिकरणानां भूमिकां विलिख्य समावेशात्मकशैक्षिकोपागमान् विस्तृतरूपेण वर्णयत।

## खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **01 (प्रश्नः) × 15 (अङ्कः) = 15**

11. समावेशात्मकशिक्षायां माध्यमिकविद्यालयेषु प्रचलितकार्यकलापनिरीक्षणं वर्णयित्वा शिक्षकाणां शिक्षकप्रशिक्षकाणाञ्च एतद्विषयकाणि कौशलानि विस्तरेण लिखत।

12. समावेशात्मकशिक्षायां विभिन्नावश्यकतावताम् ऐतिहासिकं परिप्रेक्ष्यं किम्? स्पष्टयत।